न्दा परिपूर्य न्ददनुपात्रं शुचौ देशे तीरे निधाय गायत्र्या प्रोक्ष्य तच्छिरसा त्रेधा विभज्यैकेन मूर्ध्नि आनाभेरपरेण चाधस्तादङ्गमनुलिप्याप्लाव्य चालयित्वादित्यन्निरीक्ष्य तं ध्यायन् स्नायादेतन्मलस्नानमाचरय तीरे द्विराचम्य तृतीयमस्त्रेणादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणभागमस्त्रेण दिक्षु दशसु विनिक्षिप्योत्तरन्तीर्थे क्षिप्त्वा तृतीयङ्गायत्र्याभिमन्त्रितमादित्याय दर्शयित्वा तेन मूर्ध्नि आपादात् गायत्र्या प्रणवेन वा सर्वाङ्गमनुलिप्य "सुमित्रियान आप ओषधयः सन्त्विति" सकृदन्निरात्मानमभिषिच्य "दुर्मित्रास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्म" इति स्वच्छेषमद्भिः चालयेदथ वरुणप्रार्थना तर्पणान्तेनोक्तेन विधिना स्नायात्। नास्मिन् प्राक् ब्रह्मयज्ञतर्पणादस्त्रं निष्पीड़येदयुतादयो ह्यन्ते तयोः इत्येष स्नानविधिस्तदेतद्सम्भवेऽद्भिरेव कुर्याद्भौमदिनादिषु च न गृहे न्दा स्नायान्न च शीतोदकेन शीतोष्णोदकेन गृहे स्नायान्मन्त्रविधिं वर्जयेद्बहिर्वा शुचौ देशे सर्वं पश्चात्कुर्यादिति। अथाशक्तस्य मन्त्रस्नानं शुचौ देशे शुचिराचान्तः प्राणानायम्य दर्भपाणिः सव्ये पाणावपः कृत्वा तिसृभिरापो हिष्ठेयाभिः पञ्चः प्रणवपूर्वं दर्भोदकैर्मार्जयेत्। पादयो मूर्ध्नि हृदये मूर्ध्नि हृदये पादयोर्हृदये पादयोः मूर्ध्नि चाथार्धर्चशो मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथ ऋक्शो हृदये पादयोर्मूर्ध्नि चाथ तृचेन मूर्ध्नीति मार्जयित्वा गायत्र्या दशधाभिमन्त्रिता अपः प्रणवेन पीत्वा द्विराचामेदेतन्मन्त्रस्नानम्"। शाखिभेदेनान्यविधविधानं तत्तत्सूत्रेषु द्रष्टव्यम्। ततश्च स्नत्याद्युक्तद्रव्याणां तत्तन्मन्त्राणां तद्विधानानाञ्चाभिषेचनिकत्वं बोध्यम् कर्मान्ते ५यजमानाभिषेकार्थे मन्त्रे च। ते च मन्त्राः वैदिकाः पौराणिकाश्च। तत्र मन्त्रास्तु मत्कृततुलादानादिपद्धतौ २०६ पृष्ठादौ द्रष्टव्याः। पौराणिकतान्त्रिकतत्तत्कर्मस्वधिकारसिद्ध्यर्थस्याभिषेकस्य साधने ६मन्त्रादौ ७तद्द्रव्यभेदे ८तद्विधाने च तत्र पौराणिकाभिषेकद्रव्यविधानादि "शिवमन्त्राभिषेकं यः कुर्याच्छिष्यादिकस्त्रिये" इत्यारभ्य "अस्त्ररत्नाभिषेकं" इत्यन्तेन अग्निपुराणे दर्शितम्। शाक्ताभिषेकद्रव्यविधानानि च तन्त्रे ज्ञेयानि। ९रुद्राभिषेकद्रव्ये १०तद्विधाने च तद्द्रव्यविधानादि च विधानपारिजाते रुद्रकल्पद्रुमे च द्रष्टव्यम् ११ देवाभिषेकादिसाधनद्रव्यादौ

**आभिहारिक** त्रि॰ आभिमुख्येन हारः अभिहारः प्रयोजनमस्य तत्र साधुर्वा ठञ्। अभिहारसाधने उपढौकनीये ( भेटी ) इति जगतीप्रसिद्धे द्रव्ये।

**आभीक** न॰ अभीकेन दृष्टं साम अण्। अभीकर्षिदृष्टे सामभेदे "आभीकमभिनिधनमाभीशवानि चैके कात्या॰ २५,१४,१५। एके आचार्या आभीकाद्यान्यपि सामान्यावपन्ति" कर्क॰।

**आभीक्ष्ण्य** न॰ अभीक्ष्णस्य भावः ष्यञ्। सातत्ये पौनःपुन्ये आभीक्ष्ण्यञ्च अविच्छेदेनैकरूपक्रियोत्पादनम्। "नित्यवीप्सयोः" पा॰ सूत्रे "आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये" सि॰कौ॰। "बहुलमाभीक्ष्ण्ये" पा॰ "आभीक्ष्ण्ये णमुल्" पा॰। "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति" पा॰ग॰सू॰।

**आभीर** पु॰ समन्तात् भियं राति रा—क। गोपे सङ्कीर्णजातिभेदे स हि अल्पभीतिहेतोरप्यधिकं बिभेतीतितस्य तथात्वम् "आभीरवामनयनाहृतमानसाय दत्तं मनोयदुपते! तदिदं गृहाण" उद्भटः स च सङ्कीर्णवर्णः। "ब्राह्मणादुग्रकन्यायामावृतोनाम जायते। आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः" इति मनूक्तः। "श्रीकोङ्कणादधोभागे तापीतः पश्चिमे तटे। आभीरदेशोदेवेशि! विन्ध्यशैले व्यवस्थित" इति शक्तिसङ्गम॰ उक्ते२देशभेदे ३तद्देशवासिनि ४तद्देशराजे च ब॰व॰। "एकादशकलधारि कविकुलमानसहारि। इदमाभीरमवेहि जगणमन्त्यमनुभेहि" इत्युक्तलक्षणे ५मात्रावृत्तभेदे न॰।

**आभीरपल्लि(ल्ली)** स्त्री ६त॰ वा ङीप्। गोपप्रधाने ग्रामे घोषे (गोयालपाड़ा)।

**आभीरी** स्त्री आभीरस्य पत्नी आभीरजातिर्वा स्त्री ङीप्। १आभीरभार्यायाम् २गोपजातिस्त्रियां महाशूद्रग्राम्।

**आभील** न॰ समन्तात् भयं लाति ददाति ला—क। १कष्टे २दुःखे ३भयानके तद्वति त्रि० अच्। ४तद्वति त्रि॰ "आभीलानि प्राणिनः प्रत्यवस्यन्" माघः। "रात्रौ निशीथे साभीले गतेऽर्द्धसमये नृप" इति भा॰व॰प॰११अ॰।

**आभीशव** अभीशुना दृष्टं साम—अण्। सामभेदे "आभीकमभिनिधनमाभीशवानि चैके" कात्या॰ २५,१४,१५। "आभीकाद्यानि सामान्यावपन्ति" कर्कः।

**आभु** त्रि॰ समन्तात् भवति आ+भू—डु। विभौ व्यापके "तुच्छेनाभ्वपिहितं यदासीत्" ऋ॰१०।१२९,३। "आभु व्यापकम्" भा॰ क्विप् आभूरप्यत्र "आभूभिरिन्द्रः श्रवयन्ननाभुवः" ऋ॰१,५१,९। [२दैत्यद्रक्ते।

**आभुग्न** त्रि॰आ+भुज कर्मकर्त्तरि क्त तस्य नः। १आकुञ्चिते